# Indrasya Shatchatvarimshanama Stotram

# इन्द्रस्य षड्चत्वारिंशनामस्तोत्रम्

## Document Information

Text title : Indrasya Shatchatvarimshanama Stotram

File name : indrasyaShaTchatvAriMshanAmastotram.itx

Category : deities_misc, brahmavaivartapurANa, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 21/150-159||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

# इन्द्रस्य षट्चत्वारिंशनामस्तोत्रम्

नन्द उवाच ।
इन्द्रः सुरपतिः शक्रो दितिजः पवनाग्रजः ॥ १५०॥

सहस्राक्षो भगाङ्गश्च कश्यपाङ्गज एव च ।
बिडौजाश्च सुनासीरो मरुत्वान्पाकशासनः ॥ १५१॥

जयन्तजनकः श्रीमाञ्छचीशो दैत्यसूदनः ।
वज्रहस्तः कामसखो गौतमीव्रतनाशनः ॥ १५२॥

वृत्रहा वासवश्चैव दधीचिदेहभिक्षुकः ।
विष्णुश्च वामनभ्राता पुरुहूतः पुरन्दरः ॥ १५३॥

दिवस्पतिः शतमखः सुत्रामा गोत्रभिद्विभुः ।
लेखर्षभो बलारातिर्जम्भभेदी सुराश्रयः ॥ १५४॥

सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
आखण्डलो हरिहयो नमुचिप्राणनाशनः ॥ १५५॥

वृद्धश्रवा वृषश्चैव दैत्यदर्पनिषूदनः ।
षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम् ॥ १५६॥

स्तोत्रमेतत्कौथुमोक्तं नित्यं यदि पठेन्नरः ।
महाविपत्तौ शक्रस्तं वज्रहस्तश्च रक्षति ॥ १५७॥

अतिवृष्टिशिलावृष्टिवज्रपाताच्च दारुणात् ।
कदाचिन्न भयं तस्य रक्षिता वासवः स्वयम् ॥ १५८॥

यत्र गेहे स्तोत्रमिदं यश्च जानाति पुण्यवान् ।
न तत्र वज्रपतनं शिलावृष्टिश्च नारद ॥ १५९॥

इति ब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे एकविंशाध्यायान्तर्गतं
इन्द्रस्य षट्चत्वारिंशनामस्तोत्रं सम्पूर्णम् ।

ब्रह्मवैवर्तपुराण । श्रीकृष्णजन्म, पूर्वभाग । अध्याय २१/१५०-१५९॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 21/150-159..

Proofread by PSA Easwaran

*Indrasya Shatchatvarimshanama Stotram*

pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*